श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे पञ्चविंशोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

## ॥ पञ्चमस्कन्धे पञ्चविंशोऽध्यायः ॥

श्रीशुक उवाच
तस्य मूलदेशे त्रिंशद्योजनसहस्रान्तर आस्ते
या वै कला भगवतस्तामसी समाख्यातानन्त
इति सात्वतीया द्रष्टृदृश्ययोः सङ्कर्षण -
महमित्यभिमानलक्षणं यं सङ्कर्षण -
मित्याचक्षते ॥ 1 ॥

यस्येदं क्षितिमण्डलं भगवतोऽनन्तमूर्तेः
सहस्रशिरस एकस्मिन्नेव शीर्षणि ध्रियमाणं
सिद्धार्थ इव लक्ष्यते ॥ 2 ॥

यस्य ह वा इदं कालेनोपसञ्जिहीर्षतोऽमर्ष -
विरचितरुचिरभ्रमद्भ्रुवोरन्तरेण साङ्कर्षणो
नाम रुद्र एकादशव्यूहस्त्र्यक्षस्त्रिशिखं
शूलमुत्तम्भयन्नुदतिष्ठत् ॥ 3 ॥

यस्याङ्घ्रिकमलयुगलारुणविशदनख -
मणिषण्डमण्डलेष्वहिपतयः सह
सात्वतर्षभैरेकान्तभक्तियोगेनावनमन्तः
स्ववदनानि परिस्फुरत्कुण्डलप्रभा -

मण्डितगण्डस्थलान्यतिमनोहराणि
प्रमुदितमनसः खलु विलोकयन्ति ॥ 4 ॥

यस्यैव हि नागराजकुमार्य आशिष आशासाना -
श्चार्वङ्गवलयविलसितविशदविपुलधवलसुभग -
रुचिरभुजरजतस्तम्भेष्वगुरुचन्दनकुङ्कुमपङ्कानु -
लेपेनावलिम्पमानास्तदभिमर्शनोन्मथितहृदय -
मकरध्वजावेशरुचिरललितस्मितास्तदनुराग -
मदमुदितमदविघूर्णितारुणकरुणावलोकनयन -
वदनारविन्दं सव्रीडं किल विलोकयन्ति ॥ 5 ॥

स एव भगवाननन्तोऽनन्तगुणार्णव आदिदेव
उपसंहृतामर्षरोषवेगो लोकानां स्वस्तय
आस्ते ॥ 6 ॥

ध्यायमानः सुरासुरोरगसिद्धगन्धर्वविद्याधर -
मुनिगणैरनवरतमदमुदितविकृतविह्वललोचनः
सुललितमुखरिकामृतेनाप्यायमानः स्वपार्षद -
विबुधयूथपतीनपरिम्लानरागनवतुलसिकामोद -
मध्वासवेन माद्यन्मधुकरव्रातमधुरगीतश्रियं
वैजयन्तीं स्वां वनमालां नीलवासा एककुण्डलो
हलककुदि कृतसुभगसुन्दरभुजो भगवा -
न्माहेन्द्रो वारणेन्द्र इव काञ्चनीं कक्षामुदारलीलो
बिभर्ति ॥ 7 ॥

य एष एवमनुश्रुतो ध्यायमानो मुमुक्षूणामनादि -
कालकर्मवासनाग्रथितमविद्यामयं हृदयग्रन्थिं
सत्त्वरजस्तमोमयमन्तर्हृदयं गत आशु निर्भिनत्ति

तस्यानुभावान् भगवान् स्वायम्भुवो नारदः सह
तुम्बुरुणा सभायां ब्रह्मणः संश्लोकयामास ॥ **8** ॥

उत्पत्तिस्थितिलयहेतवोऽस्य कल्पाः
सत्त्वाद्याः प्रकृतिगुणा यदीक्षयाऽऽसन्।
यद्रूपं ध्रुवमकृतं यदेकमात्मन्
नानाधात्कथमु ह वेद तस्य वर्त्म ॥ **9** ॥

मूर्तिं नः पुरुकृपया बभार सत्त्वं
संशुद्धं सदसदिदं विभाति यत्र।
यल्लीलां मृगपतिराददेऽनवद्या -
मादातुं स्वजनमनांस्युदारवीर्यः ॥ **10** ॥

यन्नाम श्रुतमनुकीर्तयेदकस्मा -
दार्तो वा यदि पतितः प्रलम्भनाद्वा।
हन्त्यंहः सपदि नृणामशेषमन्यं
कं शेषाद्भगवत आश्रयेन्मुमुक्षुः ॥ **11** ॥

मूर्धन्यर्पितमणुवत्सहस्रमूर्ध्नो
भूगोलं सगिरिसरित्समुद्रसत्त्वम्।
आनन्त्यादनिमितविक्रमस्य भूम्नः
को वीर्याण्यधिगणयेत्सहस्रजिह्वः ॥ **12** ॥

एवम्प्रभावो भगवाननन्तो
दुरन्तवीर्योरुगुणानुभावः।
मूले रसायाः स्थित आत्मतन्त्रो
यो लीलया क्ष्मां स्थितये बिभर्ति ॥ **13** ॥

**एता ह्येवेह नृभिरुपगन्तव्या गतयो यथा - कर्मविनिर्मिता यथोपदेशमनुवर्णिताः कामान् कामयमानैः ॥ 14 ॥**

**एतावतीर्हि राजन् पुंसः प्रवृत्तिलक्षणस्य धर्मस्य विपाकगतय उच्चावचा विसदृशा यथाप्रश्नं व्याचख्ये किमन्यत्कथयाम इति ॥ 15 ॥**

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
पञ्चमस्कन्धे भूविवरविध्युपवर्णनं नाम पञ्चविंशोऽध्यायः ॥